
M1G2U2

2 खेलमहोत्सवः



विवेकानन्दस्य विद्यालये खेलमहोत्सवः चलति। बालकाः प्रसन्नाः सन्ति। सर्वे कौशलस्य प्रदर्शनं कर्तुम् इच्छन्ति। कुत्रचित् धावनस्पर्धा चलति। बालकाः प्रयत्नपूर्वकं शीघ्रतया धावन्ति। कतिपयबालकाः उच्चैः वदन्ति 'धावतु धावतु त्वरितं धावतु।'

कुत्रचित् गोलक्षेपकस्पर्धा चलति। क्रमशः क्रीडकः लोहगोलकं क्षिपति।

कुत्रचित् कबड्डी चलति। कुत्रचित् क्रीडकः दीर्घलङ्घनं करोति। सम्यक्तया सर्वाः स्पर्धाः पूर्णाः भवन्ति।

समापनकार्यक्रमस्य प्रारम्भः भवति। विद्यालयस्य आचार्यः स्व-स्थानतः उत्तिष्ठति वदति च ''खेल महोत्सवे आगतानां प्रतिभागिनानां कृते अभिनन्दनम्। एषः अस्माकं प्रथमः खेलमहोत्सवः। अस्माकं शालायाम् अस्मिन् वर्षे नूतनः शिक्षकः नियुक्तः अस्ति। एतत् सर्वं तस्य प्रयासस्य फलम्। तमपि अभिनन्दनम्। अधुना अस्माकं विद्यालये व्यायामस्य प्रशिक्षणार्थं प्रशिक्षकः अपि अस्ति। सः प्रशिक्षणं दास्यति। अद्यारभ्य अस्माकं शालायां प्रतिवर्षं खेलमहोत्सवः भविष्यति। अस्माकं छात्राः राज्यकक्षायाः राष्ट्रकक्षायाः च खेलमहोत्सवे भागं ग्रहीष्यन्ति। अस्माकं शालायाः नाम उज्ज्वलं भविष्यति। जीवने खेलस्य महत्त्वम् अस्ति। खेलः सर्वांगिणविकासार्थं साहाय्यं करोति।

टिप्पणी

चलति ચાલે છે. **प्रसन्नाः** આનંદિત **कौशलस्य** કુશળતાનું **धावनस्पर्धा** દોડવાની સ્પર્ધા **शीघ्रतया/त्वरितम्** ઝડપથી **धावन्ति** દોડે છે **कतिपय** કેટલાક **उच्चैः** મોટેથી **धावतु** દોડો **गोलक्षेपकस्पर्धा** ગોળાફેંક **लोहगोलकम्** લોખંડનો ગોળો **दीर्घलङ्घन** લાંબીકૂદ **सम्यक्तया** સારી રીતે **प्रारम्भः** શરૂઆત **स्व-स्थानतः** પોતાના સ્થાન પરથી **आगतानाम्** આવેલાઓના **प्रतिभागिनाम्** ભાગ લેનારાઓના **कृते** ના માટે **ग्रहीष्यन्ति** ગ્રહણ કરશે, લેશે **उज्ज्वलम्** ઉજ્જવળ

स्वाध्यायः

J5Y8C5

1. નીચે આપેલા ઉદાહરણને આધારે વાક્યો બનાવો :

ઉદાહરણ : धावकः शीघ्रं धावति। – धावकाः शीघ्रं धावन्ति।

(1) मानवः क्रीडां पश्यति।

(2) गजः मन्दं चलति।

(3) बालकः शीघ्रं गच्छति।

(4) महिला श्लोकं गायति।

2. નીચેના પ્રશ્નોના જવાબ આપો :

(1) विवेकानन्दस्य विद्यालये किं चलति ?

(2) धावकाः किं कुर्वन्ति ?

(3) विद्यालये काः काः क्रीडाः चलन्ति ?

(4) जीवने कस्य महत्त्वम् अस्ति ?

(5) खेलः कस्यार्थे साहाय्यं करोति ?

3. નીચે આપેલ ઉદાહરણ અનુસાર વાક્યોને પરિવર્તિત કરો :


ઉદાહરણ : राधा आगच्छति। राधा आगमिष्यति।

(1) शबाना वदति। _____।

(2) मोहसीना चलति। _____।

(3) रमेशः खादति। _____।

(4) वेदः कथयति। _____।



4.

- ઉપરના ચિત્રમાં રંગ પૂરો અને ચિત્ર પરથી વાક્યો બનાવો :

(1) _____

(2) _____

(3) _____

(4) _____

(5) _____

5. નીચે આપેલા શબ્દોનું મોટેથી શુદ્ધ ઉચ્ચારણ કરો :

(1) शीघ्रतया (2) त्वरितम् (3) कुत्रचित् (4) गोलक्षेपः (5) दीर्घलङ्घनम् (6) अद्यारभ्य (7) प्रशिक्षणम्

प्रवृत्ति :

તમારા મિત્રો સાથે શેરીમાં રમતા હો તે રમતોની યાદી બનાવો.